# आनन्दवर्धनमतानुसारेण वस्तुध्वनिविषयकसंक्षिप्तवर्णनम्
## ānandavardhanamatānusāreṇa vastudhvaniviṣayakasaṃkṣiptavarṇanam

**Dr. Manteswar Barman**
Assistant Professor of Sanskrit
University B.T. and Evening College,
Keshab Road, Gunjabari, Cooch Behar
Email: barmanmanteswar@gmail.com

**Abstract:** संस्कृतकाव्यशास्त्रे बहुचर्चितविषयाणां मध्ये ध्वनिप्रसङ्गः समधिकः प्रसिद्धः वर्त्तते। आनन्दवर्धनः ध्वनिसिद्धान्तस्य प्रथमाचार्यः इति प्रसिद्धिः वर्त्तते। ध्वनिमार्गसंस्थापकः प्रथमः ग्रन्थः आनन्दवर्धनविरचितः *ध्वन्यालोको*ऽस्ति। अनेन *ध्वन्यालोक*ग्रन्थेन आनन्दवर्धनः ध्वनिसिद्धान्तं स्थापयति। ध्वनिः काव्यस्य आत्मा भवति। ध्वनिविषये आनन्दवर्धनः कथयति यत् नायं सिद्धान्तः तन्मस्तिष्कप्रसूतः। अपि तु अयं सिद्धान्तः पण्डितैः पूर्वमेव आन्मातः आसीत्। आनन्दवर्धनाचार्यः अभाववादः, भाक्तवादः अनिर्वचनीयत्ववादश्च इति ध्वनिविरोधिनां मतानि यथायथं समालोच्य ध्वनेः स्वरूपं भेदोपभेदान् च प्रतिपाद्य ध्वनेः काव्यात्मत्वं व्यवस्थापयति। ध्वनिः इति पदस्य अर्थः तन्मतेन प्रतीयमानार्थः व्यङ्ग्यार्थः वा। स प्रतीयमानार्थः वाच्यार्थसामर्थ्येन आक्षिप्तो भूत्वा काव्ये वस्तुध्वनिम्, अलंकारध्वनिं, रसध्वनिं च समुत्पादयति। अतएव वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः इति त्रिप्रकारेषु ध्वनिषु साधारणलक्षणरूपेण यद् वैशिष्ट्यं सर्वदा तिष्ठति तदस्ति वाच्यसामर्थ्याक्षिप्तत्वम्। आनन्दवर्धनः सूचयति यत् महाकवीनां वाणीषु वाच्यार्थात् भिन्नः प्रतीयमानार्थः इति अपरमेकं वस्तु वर्त्तते। स प्रतीयमानार्थः महाकवीनां वाणीषु अङ्गनादेहगतलावण्यमिव प्रतिभाति। प्रसङ्गेऽस्मिन् आनन्दवर्धनेन उच्यते यत् ललनालावण्यतुल्यः प्रतीयमानार्थः ध्वनिः भवति। यद्यपि आलंकारिकेषु आनन्दवर्धनाचार्यः ध्वनिसम्प्रदायस्य प्रथमः आचार्यः, तथा च तदीयः *ध्वन्यालोक*ग्रन्थः ध्वनिसिद्धान्तस्य प्रथमः ग्रन्थः, तथापि आनन्दवर्धनाचार्यः ध्वनिलक्षणनिरूपणप्रसङ्गे वैयाकरणानां स्फोटसिद्धान्तम् अनुसरति। आनन्दवर्धनः तदीये ग्रन्थे विधिनिषेधरूपात्मकं बहुप्रकारकं वस्तुध्वनिं प्रतिपादयति। अनेन वस्तुध्वनेः काव्ये गुरुत्वं संसूचितमस्ति। काव्ये वस्तुध्वनेः उपस्थितिः चारुत्वाधिक्यं प्रकाशयति इति पूर्वमेव उक्तमस्ति।

**Keywords:** ध्वनिः, आनन्दवर्धनः, वस्तुध्वनिः, काव्यस्य, आत्मा, ध्वन्यालोकः, वाच्यार्थः, व्यङ्ग्यार्थः।

**वस्तुध्वनिः, तल्लक्षणं स्वरूपादिकं च—**

आनन्दवर्धनाचार्यः *ध्वन्यालोकस्य* प्रथमोद्योते ध्वनेः स्वरूपं वर्णयित्वा तस्य भेदविषये आलोचयन् कथयति यत् मुख्यतया ध्वनेः भेदत्रयमस्ति[1]। तत् यथा वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः च। अस्मिन् प्रकारत्रये सर्वत्रैव वाच्यार्थात् सर्वथा प्रतीयमानार्थस्य भिन्नत्वं परिलक्ष्यते[2]। ध्वनिप्रकारे सर्वत्र प्रतीयमानार्थः वाच्यार्थसामर्थ्येन आक्षिप्तो भूत्वा वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः च इति रूपत्रयेण प्रकाशितो भवति रसज्ञचित्ते[3]। अतः वस्तुध्वनिः, अलंकारध्वनिः, रसध्वनिः चेति त्रयाणां ध्वनिनां सामान्यवैशिष्ट्यं वाच्यसामर्थ्याक्षिप्तत्वम् इति वक्तुं शक्यते। यद्यपि ध्वननकार्यं शब्दस्य ब्यापारो भवति, किन्तु ध्वनिविषये अर्थशक्तिसहकारिता सर्वदा वर्त्तते। वाच्यार्थः ध्वनिविषये अन्यतमम् उपादानं भवति। अतएव ध्वनिविषये वाच्यार्थस्य गुरुत्वं सर्वथा परिलक्ष्यते। उदाहरणेन एकेन आनन्दवर्धनः विषयमिमं प्रकटयति तदीये ग्रन्थे। यथा आलोकार्थी जनः आलोकोपायरूपेण दीपशिखां प्रति यत्नवान् भवति, तद्वद् व्यङ्ग्यार्थप्रत्याशी व्यङ्ग्यार्थसूत्ररूपेण वाच्यार्थं प्रति यत्नवान् भवति[4]। अभिनवगुप्ताचार्येण *लोचने* सविस्तारम् इदं व्याख्यायते। एतदपि तत्रभवता दर्शितं यत् वस्तुध्वन्यलंकारध्वनिरसध्वनीनां बहवः अवान्तरभेदाः सम्भवन्ति। परन्तु तत्र मुख्यरूपेण प्रतीयमानार्थस्य भेदद्वयमस्ति, लौकिकः इति प्रथमः, काव्यव्यापारगोचरः इति द्वितीयः चेति[5]। लौकिकप्रतीयमानार्थः विधिनिषेधादिनिष्ठः अनेकप्रकारको भवति[6]। काव्यवस्तुसहयोगी लौकिकप्रतीयमानार्थः वस्तुध्वनिं सूचयति। वस्तुध्वनिः इति पदे वस्तु इति पदं महदर्थम् आवहति। विश्वनाथमतानुसारं वस्तुपदं काव्यगतं वर्णनीयविषयं सूचयति[7]। अत्र एतदपि उल्लेखनीयं यत् विश्वनाथः तदीये *साहित्यदर्पणे* कथाकाव्यस्य लक्षणविषये वस्तु इति पदं व्यवहरति[8]। विश्वनाथमतानुसारं वस्तु सामान्यतः द्विप्रकारकम्- आधिकारिकं प्रासङ्गिकं च[9]। काव्यनिष्टफलप्रभुत्वम् अधिकारपदवाच्यं भवति। अधिकारी काव्यफलस्य भोक्ता अर्थात् प्रभुः भवति। अधिकारस्य भावः इति आधिकारिकम् अधिकारसंयुक्तं काव्यवस्तु इति स्पष्टम्[10]। उदाहरणं यथा- राजशेखरविरचिते *बालरामायणे* रामचरितम् इति आधिकारिकं कथावस्तु। तथा च, आधिकारिकेतिवृत्तस्य परिपुष्टिनिमित्तं यत् आलोच्यते काव्ये तत् प्रासङ्गिकं कथावस्तु इत्युच्यते[11]। यथा— *बालरामायणे* रामचरितवर्णनप्रसङ्गे सुग्रीवादिचरितवर्णनं प्रासङ्गिकं वस्तु भवति। ध्वनिप्रसङ्गे वस्तुपदेन काव्यनिष्ठशब्दवाच्यतातिक्रान्तः लौकिकविधिनिषेधादिकः अनेकप्रकारकः अर्थः सूच्यते। अस्य ध्वनेः कथावस्तुना सह प्रत्यक्षतया सम्बन्धः तिष्ठति। अतएव वक्तुं शक्यते यत् वाच्यार्थापेक्षया यः चमत्कारी व्यङ्ग्यार्थरूपः लौकिकविधिनिषेधादिविषयः सहृदयहृदयम् आह्लादयति स वस्तुध्वनिः इत्युच्यते। काव्यजगति वर्तमानः वस्तुध्वनिः रूपभिन्नत्वं भजते। स कदाचित् विधिमुखे प्रतिषेधरूपः, कदाचित् प्रतिषेधमुखे विधिरूपः, क्वचिद् विधिरूपे वाच्ये अनुभयरूपः, क्वचिद् पुनः प्रतिषेधरूपे वाच्ये अनुभयरूपः दृश्यते। विधिः इति शब्दस्य अर्थः विधानं नियमः वा। विधिशब्देन एकस्मिन् कार्ये प्रवृत्तिः बोध्यते। प्रतिषेधः इति शब्दस्य अर्थः निषेधः। प्रतिषेधशब्देन कापि वाधा सूच्यते। विधिनिष्ठः प्रतीयमानार्थः तथा च

प्रतिषेधनिष्ठः प्रतीयमानार्थः वाच्यार्थात् भिन्नतां प्राप्य ध्वनिकाव्ये तिष्ठति[12]। आनन्दवर्धनः एतदपि स्पष्टीकरोति यत् वस्तुध्वनिः वाच्यार्थात् बहुदूरम् अवतिष्ठति[13]। अपि च, वाच्यार्थे यदि उपमाद्यलंकारः वर्त्तते परन्तु व्यङ्ग्यार्थे तेषाम् उपस्थितिः न सौन्दर्यकारणं भवति, तदा तदपि वस्तुरूपेण गृह्यते। अत्र अलंकारस्य वस्तुध्वनित्वं ब्राह्मणश्रमणन्यायेन सिध्यति। यदि कोऽपि ब्राह्मणः बौद्धधर्मं गृहीत्वा भिक्षुः भवति, तदा स ब्राह्मणश्रमणः इति कथ्यते। यद्यपि भिक्षावृत्तिग्रहणात् स प्रकृततः ब्राह्मणः न वर्त्तते, तथापि तन्मध्ये ब्राह्मणत्वस्य पूर्वसंस्कारादिकं वर्त्तते एव। एतादृक्बौद्धभिक्षुः ब्राह्मणश्रमणः इति नाम्ना ज्ञायते। एवंरूपेण यदि वाच्यार्थप्रकाशनकाले उपमादिरूपः यः अलंकारः वर्त्तते, व्यङ्ग्यार्थसूचनकाले स उपमाद्यलंकारः यदि वाच्यार्थात् अधिकचमत्कारित्वं लभते, तदा एतत् वस्तुध्वनिरूपेण वर्त्तते। एतदपि अभिनवगुप्ताचार्येण स्पष्टीकृतमस्ति यत् आनन्दवर्धनः 'वस्तुमात्रमलंकारा रसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते' इत्यत्र मात्रपदप्रयोगं कृत्वा सूचयति यत् वस्तुध्वनिः अलंकारध्वनितः रसध्वनितः च भिन्नः वर्त्तते[14]।

विधिरूपे वाच्यार्थे सति प्रतिषेधरूपस्य प्रतीयमानार्थस्य उदाहरणप्रदर्शनप्रसङ्गे आनन्दवर्धनाचार्यः कविहालविरचितस्य *गाथाशप्तशती* इति ग्रन्थस्य श्लोकं निर्दिशति। तत् यथा—

"भम धम्मिअ विसथ्थो सो सुणओ अज्ज मारिओ देण।
गोलाणई-कच्छ-कुडङ्गवासिना दरिअसीहेण॥"[15]

वाच्यरूपेण अयं श्लोकः सूचयति यत् अहो धार्मिक, अधुना त्वमत्र निश्चिन्तः भूत्वा भ्रमितुं शक्नोषि। यतः स शुनकः यस्मात् त्वं भयभीतः आसीत्, स गोदावरीनदीतीरस्थलताकुञ्जवासिना हिंस्रसिंहेन हतो भवति। अतएव तदीयं भयकारणमपि गतमस्ति। अर्थप्रकाशनस्य प्रथमस्तरे अयं श्लोकः बोधयति यत् यस्मात् शुनकात् भवान् विभेति सः अद्य नास्ति, हिंस्रेण सिंहेन हतो भवति सः। अतः भवदीयं भयकारणं सर्वथा दूरीभूतं जायते। अधुना भवान् निर्भयेन भ्रमितुं समर्थः इति वाच्यार्थः। आपातदृष्ट्या एतत् वाक्यं निश्चितभ्रमणरूपं विधिरूपं वाच्यार्थं सूचयति। परन्तु अस्य वाक्यस्य चारुत्वम् अस्मिन् विधिरूपे वाच्यार्थे नास्ति। अस्य श्लोकस्य प्रतीयमानार्थः तावत् वाच्यार्थात् विपरीतं निषेधार्थं प्रकाशयति। श्लोकस्य अस्य प्रतीयमानार्थः एवमेव जायते यत् कस्याश्चित् रमण्याः प्रियमिलनस्थाने कस्यचित् धार्मिकस्य नित्यसञ्चरणं प्रेमिकयुगलस्य प्रेमालापे अन्तरायरूपेण जातम्। सा रमणी सम्यक् जानाति यत् एष धार्मिकः शुनकात् विभेति। अस्य धार्मिकस्य पुनः संकेतस्थानागमनं केन प्रकारेण न भवेत् तद्विचिन्त्य उपायरूपेण सा रमणी धार्मिकं कथयति यत् तद्भयकारणरूपेण स्थितः शुनकः वर्तमानसमये दृप्तसिंहेन हतोऽस्ति। वाचिकार्थात् ज्ञायते यत् धार्मिकस्य भयकारणं सर्वथा अधुना अपाकृतं वर्त्तते। अतः इदानीं स निर्भयं भ्रमितुं शक्नोति। परन्तु श्लोकस्य अन्तर्निहितः अर्थः पुनः विपरीतः। पद्येऽस्मिन् रमण्याः उद्देश्यं सुस्पष्टं यत् यो धार्मिकः शुनकात् विभेति, स अवश्यमेव हिंस्रसिंहात् अधिकं भेष्यति।

अतः हिंस्रसिंहभयात् स जनः तत्संकेतस्थानं पुनः कदापि न आगमिष्यति इति निश्चितमेव, यतः सिंहः शुनकात् हिंस्रतरो भवति। अनेन प्रेमिकायाः लक्ष्यसिद्धिः भविष्यति। वस्तुतस्तु अनेन वाक्येन धार्मिकस्य पुनरागमनं निवार्यते। अतएव अत्र वाच्यार्थे विधिरूपे निषेधरूपः गुढार्थः प्रतिपाद्यते। अत्र धार्मिकस्य भ्रमणनिवृत्तौ रमण्याः प्रवृत्तिः सूच्यते। अतएव अत्र निषेधाभावरूपा विधिः प्रतिप्रसवात्मको भवति। अपवादस्य अपवादः प्रतिप्रसवः इति कथ्यते[16]। यद्यपि नियोगरूपः कोऽपि विधिः प्रत्यक्षतया अत्र प्राप्यते परन्तु अस्मिन् काव्ये अन्तर्निहितार्थः तु प्रतिषेधरूपम् अर्थं स्थापयति। अत्र वाच्यार्थे एकं भयसूत्रम् अधिकभयकारणेन अपहितम्, अतः आगमनवाधा व्यङ्ग्यार्थरूपेण प्रतिपादिता अस्ति। एष प्रतीयमानार्थरूपवाधकार्थः सहृदयहृदयाह्लादकः अस्ति। एवमत्र वक्तुं शक्यते यत् अर्थग्रहणे अत्र कश्चित् स्तरः विद्यते। प्रथमस्तरे विधिरूपस्य अर्थस्य ज्ञानं भवति, द्वितीयस्तरे निषेधरूपस्य अर्थस्य प्रतीतिः भवति। अर्थात् कोऽपि एतत् वक्तुं न शक्नोति यत् विधिः निषेधः च परस्परं विपरीतार्थद्वयम् अत्र युगपदेव उद्भवति। तथात्वे तु विधिः निषेधः च द्विप्रकारकः अर्थः वाच्यार्थः स्यात्। अत्र न कथमपि एतत् भवति। पक्षान्तरे प्रथमे वाच्यार्थप्रतीतिः जायते तदनन्तरं च व्यङ्ग्यार्थज्ञानं भवति। अतएव आनन्दवर्धनमतेन अस्य श्लोकस्य वाच्यार्थो भवति विधिरूपः *भ्रम* इति अर्थः, परन्तु अस्य प्रतीयमानार्थो भवति *न भ्रम* इति प्रतिषेधरूपः अर्थः। अतः अत्र आनन्दवर्धनकृतनियमेन विधिरूपवाच्यार्थे प्रतिषेधरूपः वस्तुध्वनिः प्राप्यते[17]। अभिनवगुप्ताचार्येण तदीये *लोचने* तत् विशदीक्रियते[18]।

**वस्तुध्वनेः गुरुत्वप्रतिपादनम्—**

आनन्दवर्धनः तदीये ग्रन्थे विधिनिषेधरूपात्मकं बहुप्रकारकं वस्तुध्वनिं प्रतिपादयति। अनेन वस्तुध्वनेः काव्ये गुरुत्वं संसूचितमस्ति। काव्ये वस्तुध्वनेः उपस्थितिः चारुत्वाधिक्यं प्रकाशयति इति पूर्वमेव उक्तमस्ति। तथापि वस्तुध्वनिप्रसङ्गे केषांचन प्रश्नानाम् आपत्तिः आगच्छति। वस्तुध्वनिसन्दर्भे पूर्वपक्षैः वक्तुं शक्यते यत् वस्तुध्वनिविषये लक्षणाशक्तिः अथवा तात्पर्यशक्तिः कार्यकरिणी भवितुम् अर्हति[19]। यदि एवं भवति, तदा तु तत्प्रसङ्गे ध्वनेः आशयः न आगच्छति।

'भ्रम धार्मिक' इत्यादि श्लोके ध्वनिप्रसङ्गः कथम् आगच्छति इति विषयमधिकृत्य वस्तुध्वनेः गुरुत्वं ध्वन्यालोके प्रतिपादितमस्ति। केषांचित् मतेन लक्षणाशक्त्या तात्पर्य्यशक्त्या वा उक्तश्लोकस्य प्रतीयमानार्थः प्राप्यते[20]। तेषाम् आशयः यत् अभिधाशक्त्या शब्दस्य संकेतितार्थः बोध्यते[21]। अर्थात् अभिधाशक्त्या शब्दस्य मुख्यार्थः वाच्यार्थः अभिधेयार्थः वा प्रकाश्यते। 'भ्रम धार्मिक' इत्यादि श्लोके अभिधाशक्तिः शब्दस्य साधारणम् अर्थम् अर्थात् *भ्रमणं कुरु* इत्यादिरूपम् अर्थं प्रकाशयति। यतः अभिधाशक्त्या व्यङ्ग्यार्थः प्रतीयमानार्थः वा न कथमपि प्रकाश्यते, अतएव अस्मिन् श्लोके अपि *भ्रमणं न कुरु* इति प्रतिषेधनिष्ठः अर्थबोधः न सम्भवति अभिधया। अतः अत्र वाच्यार्थेन *भ्रमणं कुरु* इति विधिरूपं ज्ञानं भवति, परन्तु प्रतीयमानार्थेन *भ्रमणं न कुरु* इति निषेधरूपज्ञानस्य प्रतीतिः भवति। इदमत्र निश्चीयते यत् एकेन व्यापारेण संकेतितार्थस्य ज्ञानं

भवति, अपरेण व्यापारेण प्रतिषेधरूपस्य अर्थान्तरस्य बोधो जायते। अतः निश्चितरूपेण ज्ञायते यत् अभिधाशक्त्या उक्तगाथायाः प्रतीयमानार्थरूपः मूलभूतः निषेधार्थः कथमपि न प्राप्यते। अस्मात् कारणात् अत्र ध्वनिप्रसङ्गः आगच्छति। प्रसङ्गेऽस्मिन् अभिनवगुप्ताचार्येण तदीये *लोचने* विशदालोचनं कृतमस्ति[22]। काव्ये विधिनिषेधयोः भावाभावत्वं वर्त्तते। अतएव द्वयोः परस्परं विरोधभावः अनिवार्यः। भावाभावयोः विरोधत्वात् सममेव तयोः वाच्यत्वं न भवति। तथापि न हि तत्र क्रमप्रसङ्गः आगच्छति। यदा व्यापारद्वयोः मध्ये अविरोधः तिष्ठति तदा एकस्मात् परम् अपरस्य आगमनं भवति। उक्ते श्लोके भावाभावयोः विधिनिषेधयोः विरोधः अस्ति, अतएव एकया अभिधया युगपत् उभयप्रकारकस्य अर्थस्य प्रसक्तिः न कथमपि सम्भवति। 'शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभावः'[23] इति नियमानुसारेण ध्वंसे प्राप्ते शब्दबुद्धिकर्म्मणां पुनरावृत्तिः न सम्भवति। अनेन न्यायेन काव्येषु अभिधालक्षणतात्पर्य्याख्याः तिस्रः वृत्तयः स्वं स्वम् अर्थं बोधयित्वा एकैकम् उपक्षीणाः भवन्ति। वृत्तिविषये एतत् स्पष्टं यत् एकेन व्यापारेण अर्थद्वयस्य प्रतीतिः कथमपि न सम्भवति। इत्थम् अत्र व्यापारद्वयस्य स्थितिः प्रसक्ता तिष्ठति। अभिधाभिन्नेन तेन व्यापारेण अत्र विधिभिन्नस्य प्रतिषेधरूपार्थस्य अवगतिः सम्भवति इति स्पष्टमस्ति[24]। स व्यापारः व्यञ्जनारूपेण गृह्यते।

ततः तात्पर्यशक्तिप्रयोगेण गाथायाः अस्याः *भ्रमणं न कुरु* इति निषेधरूपार्थप्राप्तिः सम्भवति इति अभिहितान्वयवादिनः वदन्ति। तेषाम् एतदभिमतं यत् गाथायां व्यवहृतः दृप्तः, धार्मिकः, तद् इति शब्दत्रयाणां अन्वयः तात्पर्यं विना न सम्भवति। अत्र रमण्याः प्रधानमुद्देश्यं भ्रमणनिषेधः वर्त्तते। अतएव विपरीतलक्षणया तात्पर्यशक्तिः अत्र *भ्रमणं न कुरु* इति निषेधरूपार्थं बोधयितुं शक्नोति। तेषां मतेन वाक्येऽस्मिन् वाच्यातिरिक्तः कोऽपि प्रतीयमानार्थः नास्ति। अतएव ध्वनिप्रसङ्गः अपि न आगच्छति। किन्तु अभिनवगुप्ताचार्यः तदीये *लोचने* अभिहितान्वयवादिनां मतमिदं युक्तिसहकारेण खण्डयति। तस्य आशयः यत् अभिधाशक्तिः मुख्यरूपेण सर्वदा शब्दस्य जातिगुणद्रव्यक्रियागतं साधारणार्थं प्रकाशयति[25]। अतएव तन्मतेन शब्दस्य विशेषार्थबोधनाय तात्पर्यशक्त्याः प्रयोजनं भवति। मुख्यार्थलक्ष्यार्थव्यङ्ग्यार्थेषु निवृत्तेषु तात्पर्यशक्तिः शब्दार्थयोः अन्वयसिद्धौ कारणं भवति[26]। किन्तु अत्र लक्षणीयं यत् शब्दार्थान्वयप्रतीतेः पश्चात् तात्पर्यशक्त्या अर्थान्तरं न गृह्यते[27]। 'भ्रम धार्मिक' इत्यादिश्लोकविषये अभिनवगुप्ताचार्यस्य अयम् आशयः यत् तात्पर्यशक्तिप्रयोगेण गाथायाः अस्याः एषा अर्थप्रतीतिः भवति यत् धार्मिक, त्वं निश्चिन्तः भूत्वा *भ्रमणं कुरु* अत्र। यथा हि त्वं यत्शुनकात् विभेषि अधुना स दृप्तसिंहेन हतो भवति। एतत् वाच्यार्थवत् विधिरूपम् अर्थं सूचयति इति स्पष्टम्। किन्तु अत्र न केनापि प्रकारेण तात्पर्यवृत्या *भ्रमणं न कुरु* इति काव्यचारुत्त्वहेतुभूतस्य प्रतीयमानार्थस्य भ्रमणनिषेधव्यापाररूपस्य प्रतीतिः जायते। अतः अस्मिन् प्रसङ्गे एषा तात्पर्यवृत्तिः प्रतीयमानार्थसूचने न सक्षमा अस्ति। किन्तु प्रतीयमानस्य चारुत्वातिशय्ययुक्तस्य अर्थस्य चोदना एव काव्यकर्त्तुः लक्ष्यरूपा अस्ति अस्मिन् वाक्ये। अतः वक्तुं शक्यते यत् अस्मिन् वाक्यप्रसङ्गे व्यङ्ग्यार्थप्रतिपादने तात्पर्यशक्तिः न समर्था

अस्ति। अतः प्रस्तुतार्थग्रहणार्थं श्लोकेऽस्मिन् व्यापारान्तरस्य प्रसङ्गः समागच्छति। स एव व्यापारः ध्वनिः भवितुम् अर्हति। एतत् सर्वं अभिनवगुप्ताचार्यः तदीये *लोचने* सम्यग्रूपेण स्पष्टीकरोति[28]।

इष्टार्थवोधनविषये मीमांसकाः महतीं भूमिकां निर्वाहयन्ति। मीमांसकाः वेदव्याख्यातरः सन्ति। काव्यगतशब्दार्थविषये अपि मीमांसकानाम् अभिमतं प्रायशः संगृह्यते। ध्वनिविषये अपि मीमांसकाभिमतम् आनन्दवर्धनाचार्येण अभिनवगुप्तपादेन च स्थाने स्थाने प्रतिपादितमस्ति। वर्तमानप्रसङ्गे अपि मीमांसकप्रदत्तस्य प्रश्नस्य आलोचना क्रियते। आक्षिप्यते मीमांसकैः यत् अस्मिन् गाथावचने विपरीतलक्षणया तात्पर्य्यशक्तिः आकाङ्क्षितमर्थं प्रकाशयति। अतः ध्वनेः प्रयोजनं नास्ति इति तेषाम् आशयः। तद्विषये उत्तररूपेण श्रीमदभिनवगुप्तपादः *लोचने* कथयति यत् अत्र विपरीतलक्षणायाः अवकाशः नास्ति[29]। यदा मुख्यार्थस्य वाधा भवति, तत्र हि लक्षणायाः प्रसङ्गः आगच्छति। विश्वनाथमतानुसारं मुख्यार्थबाधे प्रसिद्धिवशतः अथवा प्रयोजनवशतः शब्दस्य या शक्तिः मुख्यार्थसम्बन्धम् अन्यार्थं प्रतिपादयति, सा एव शब्दशक्तिः लक्षणा इत्युच्यते[30]। प्रस्तुतोदाहरणे परन्तु भ्रमणभयकारणे दूरीभूते सति *भ्रमणं कुरु* इति अर्थग्रहणे कापि वाधा नास्ति मुख्यार्थबाधशून्यत्वात्। अतः अत्र लक्षणायाः कोऽपि अवसरः न आगच्छति। एवं वक्तुं शक्यते यत् 'भ्रम धार्मिक' इत्यादिश्लोके *धार्मिक न भ्रम* इत्यादिरूपार्थग्रहणे अपि मुख्यार्थबाधप्रसङ्गः न कथमपि आगच्छति।

अतएव एतत् स्पष्टं यत् गाथागतोदाहरणप्रसङ्गे अभिधा-लक्षणा-तात्पर्य्यरूपेण शब्दशक्तित्रयेण *भ्रमणं न कुरु* इति प्रतिषेधरूपः व्यङ्ग्यार्थप्रकाशः न कथमपि सम्भवति। अतएव अत्र व्यङ्ग्यार्थप्रकाशार्थं ध्वननव्यापारस्य प्रयोजनीयता स्वाभाविकी। अभिनवगुप्ताचार्यः *लोचने* विस्तरेण एतत् स्पष्टीकरोति। तत्रभवता एवं स्पष्टतया लिखितं यत् ध्वननं, द्योतनं, व्यञ्जनं, प्रत्यायनं, अवगमनम् इति ये शब्दाः व्यवह्रियन्ते ते सर्वे एव समार्थकाः वर्त्तन्ते[31]। अभिधानग्रन्थे अपि एवं प्राप्यते[32]। एते सर्वे एव ध्वनिव्यापारं सूचयन्ति। अभिधा-तात्पर्य-लक्षणाः इति शब्दशक्तित्रयं ध्वननव्यापारस्य उपकारकं भवति इति तु निश्चितमेव[33]। एताः सर्वाः शब्दशक्तयः व्यञ्जनाव्यापारस्य सहायकारिण्यः भवन्ति। परन्तु अयं ध्वननव्यापारः अभिधा-तात्पर्य-लक्षणाः इति शब्दशक्तीः कार्यहीनाः कृत्वा प्रधानभूतः वर्त्तते[34]। अतः अस्मिन् काव्यप्रसङ्गे अपि वक्तुं शक्यते यत् उल्लिखितगाथायाः प्रतिपाद्यविषयरूपेण वर्त्तते यत् सिंहभयात् धार्मिकः दूरं गमिष्यति, येन प्रियमिलनसंकेतस्थानं जनशून्यं भविष्यति। येन तेन प्रेमिकयुगलस्य निभृतमेलनं सम्भविष्यति। एतत् वक्तुं शक्यते यत् काव्यार्थस्य निषेधप्रतीत्या अयं व्यङ्ग्यार्थः सिद्धो भवति। अतएव अत्र विधिरूपे वाच्ये प्रतिषेधरूपवस्तुध्वनिः दृश्यते[35]। एवमेव आनन्दवर्धनः 'अत्ता एत्थ निमज्जइ'[36] इत्यादिश्लोके प्रतिषेधरूपे वाच्ये विधिरूपवस्तुध्वनिं सूचयति।

**उपसंहारः—**

आनन्दवर्धनेन एतत् सुस्पष्टम् उक्तं यत् महाकवीनां काव्येषु वाच्यार्थात् भिन्नः प्रतीयमानार्थः

वर्त्तते। तत्रभवता रमणीदेहगतलावण्येन सह एष विषयः उपमीयते। रमणीनां लावण्यं यथा तासां देहगताङ्गसमुदायात् भिन्नरूपेण तिष्ठति, तथैव महाकवीनां काव्येषु अपि काव्यगतगुणालंकाराद्युपादानेभ्यः प्रतीयमानार्थः भिन्नः तिष्ठति[37]। अयं प्रतीयमानार्थः सहृदयहृदयेषु स्वतन्त्रतत्त्वरूपेण प्रकाशितो भवति। ध्वनिनिष्णातपण्डितमतेन ध्वनिकाव्ये व्यङ्ग्यार्थस्य प्राधान्यं वर्त्तते। व्यङ्ग्यार्थविशेषेन काव्यं पूर्णतां प्राप्नोति। एतदेव उत्तमकाव्यरूपेण स्वीक्रियते आलंकारिकादिभिः[38]। अतः ध्वनिकाव्यं सर्वदा सर्वथा सहृदयानां हृदयाह्लादकारि भवति। ध्वनिं विना काव्यं चित्रकाव्यमेव परिगण्यते काव्यशास्त्रज्ञैः[39]। तेन ध्वनिप्रकारविशेषस्य वस्तुध्वनेरपि गुरुत्वं काव्ये नितरां स्वीक्रियते। एकस्य काव्यस्य वस्तुध्वनिरपि चमत्कारी भूत्वा साहित्याकाशे तत्काव्यगतोत्कृष्टतां प्रज्वालयति सहृदयहृदये।

## Endnotes

1. वस्तुमात्रमलंकाररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
2. सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्। तत्रैव।
3. स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंकाररसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यति। तत्रैव।
4. आलोकार्थी यथा दीपशिखायां यत्नवान् जनः। तदुपायतया तद्वदर्थे वाच्ये तदादृतः॥ *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-९।
5. तत्र प्रतीयमानस्य तावत् द्वौ भेदौ- लौकिकः काव्यव्यापारैकगोचरश्चेति। तत्रैव ।
6. लौकिकः यः स्वशब्दवाच्यतां कदाचिदधिशेते, स च विधिनिषेधाद्यनेकप्रकारो वस्तुशब्देनोच्यते। तत्रैव।
7. वस्त्वितिवृत्तम्। *साहित्यदर्पणः,* षष्ठः परिच्छेदः, कारिका-४१, वृत्तिभागः।
8. कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्। तत्रैव, कारिका-३३२।
9. इदं पुनर्वस्तुवुधैर्द्विविधं परिकल्प्यते। आधिकारिकभेदं स्यात् प्रासङ्गिकमथापरम्॥ तत्रैव, कारिका-४२।
10. अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः। तस्येतिवृत्तं कविभिराधिकारिकमुच्यते॥ *साहित्यदर्पणः,* षष्ठः परिच्छेदः, कारिका-४३ ।
11. अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते। *साहित्यदर्पणः,* षष्ठः परिच्छेदः, कारिका-४३, वृत्तिभागः।
12. अन्ये चैवंप्रकारा वाच्याद् विभेदिनः प्रतीयमानभेदाः सम्भवन्ति। *ध्वन्यालोकः,* प्रथमोद्योतः,कारिका-४, वृत्तिभागः।
13. तथा हि आद्यस्तावत्प्रभेदो वाच्याद् दूरं विभेदवान्। तत्रैव।
14. मात्रग्रहणेन हि रूपान्तरं निराकृतम्। *लोचनम्,* प्रथमोद्योतः, कारिका-४, वृत्तिव्याख्याभागः।
15. *गाथासप्तशती,* द्वितीयशतकम्, श्लोकः-७५।
16. शिवप्रसाद द्विवेदी, *ध्वन्यालोकः,* चौखाम्बा सुरभारती प्रकाशन, वाराणसी, २०१३।
17. स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।

18. तत्र स्वतःसिद्धमपि भ्रमणं श्वभयेनापोदितमिति प्रतिप्रसवात्मको निषेधाभावरूपः, न तु नियोगः प्रैषादिरूपोऽत्र विधिः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
19. ननु तात्पर्याशक्तिरपर्य्यवसिता विवक्षया दृप्तधार्मिकतदादिपदार्थानन्वयरूपमुख्यार्थवाधवलेन विरोधनिमित्तया विपरीतलक्षणया च वाक्यार्थीभूतनिषेधप्रतीतिमभिहितान्वयदृशा करोति इति शब्दशक्तिमूल एव सोऽर्थः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
20. तत्रैव।
21. तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा। *साहित्यदर्पणः,* द्वितीयः परिच्छेदः, कारिका-७।
22. तत्र भावतदभावयोर्विरोधाद् द्वयोस्तावन्न युगपद्वाच्यता, न क्रमेण, विरम्य व्यापाराभावात्। विशेष्यं नाभिधा गच्छेत् इत्यादिनाभिधाव्यापारस्य विरम्य व्यापारासंभवाभिधानात्। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
23. शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभावः— इति नयेन अभिधालक्षणतात्पर्य्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु, यया अन्योऽर्थो बोध्यते, सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम। *साहित्यदर्पणः,* द्वितीयः परिच्छेदः, कारिका-२४, वृत्तिभागः।
24. तस्मादभिधातात्पर्य्यलक्षणाव्यतिरिक्तश्चतुर्थोऽसौ व्यापारो ध्वननद्योतनव्यञ्जनप्रत्यायनावगमनादि-सोदरव्यपदेशनिरूपितोऽभ्युपगन्तव्यः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
25. संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च। *साहित्यदर्पणः,* द्वितीयः परिच्छेदः, कारिका-८।
26. तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयवोधने। तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्वोधकं परे।। तत्रैव, कारिका-३२ ।
27. प्रतिपत्तिश्चान्वयस्य नाभिधाशक्त्या, तस्याः पदार्थप्रतिपत्त्युपक्षीणाया विरम्याव्यापारात् इति तात्पर्य्यशक्त्यैवान्वयप्रतिपत्तिः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
28. ननु तात्पर्यशक्तिरपर्यवासिना विवक्षया दृप्तधार्मिकतदादिपदार्थानन्वयरूपमुख्यार्थबाधबलेन विरोधनिमित्तया विपरीतलक्षणया च वाक्यार्थीभूतनिषेधप्रतीतिमभिहितान्वयदृशा करोतीति शब्दशक्तिमूल एव सोऽर्थः। एवमनेनोक्तमिति हि व्यावहारः, तन्न वाच्यातिरिक्तोऽन्योऽर्थ इति। तत्रैव।
29. अतएव मुख्यार्थवाधा नात्र शङ्क्येति न विपरीतलक्षणायाः अवसरः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
30. मुख्यार्थवाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद् वासौ लक्षणा शक्तिरर्पिता॥ *साहित्यदर्पणः,* द्वितीयः परिच्छेदः, कारिका-९।
31. अशोककुमार वन्द्योपाध्यायः, *ध्वन्यालोकः,* संस्कृत पुस्तक भाण्डार, कोलकाता, २००८, पृ-४६।
32. ए. ए. मैकडोनेल, *ए प्राक्टिक्याल संस्कृत डिक्शनेरी,* अक्सफोर्ड इउनिभार्सिटि प्रेस, लण्डन, १९२४, पृ-२९, १२७, १३५, १७७, ३०२।
33. तच्छक्तित्रयोपजनितार्थावगममूलजाततत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायार्थद्योतनशक्तिर्ध्वनन व्यापारः। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।

34. स च प्राग्वृत्तं व्यापारत्रयं न्यक्कुर्वन् प्रधानभूतः काव्यात्मेत्याशयेन निषेधप्रमुखतया च प्रयोजन-विषयोऽपि निषेधविषय इत्युक्तम्। *लोचनम्,* प्रथमोद्यतः, कारिका-४, वृत्तिव्याख्याभागः।
35. स हि कदाचिद् वाच्ये विधिरूपे प्रतिषेधरूपः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-४, वृत्तिभागः।
36. अत्ता एत्थ निमज्जइ एत्थ अहं दिअसअं पलोएति। मा परिअ रत्तिअन्धअ सेज्जाए मह निमज्जिहिसि॥ तत्रैव।
37. प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।। तत्रैव, कारिका-४।
38. इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः। *काव्यप्रकाशः,* प्रथमोल्लासः, कारिका-४ ।
39. स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम्। ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामः। *ध्वन्यालोकः,* प्रथमोद्योतः, कारिका-१३, वृत्तिभागः।

## Bibliography


- काले एम्. आर्. *अभिज्ञानशकुन्तलम्,* दशमसंस्करणम्, मोतीलाल वनारसीदास, दिल्ली, १९६९ ।
- द्विवेदी एस्. पी. *ध्वन्यालोकः,* प्रथमसंस्करणम्, चौखाम्वा सुरभारती प्रकाशन, वाराणसी, २०१३ ।
- शास्त्री आर्.आर्. *काव्यादर्शः,* भान्डारकर ओरियेन्टाल् रिसार्च इन्सटिटिउट्, पुना, १९६५ ।
- मुखोपाध्यायः बी. के. *साहित्यदर्पणः,* द्वितीयसंस्करणम्, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१३
- झा एम्. एम्. *रसगङ्गाधर,* चौखाम्बा विद्याभवनम्, वारानसी, २००५ ।
- राघवनः वी. *शृङ्गारप्रकाशः,* पुनर्वसु, माद्राज, १९६३ ।
- शर्मा आर्. *काव्यालङ्कारः,* व्दितीयसंस्करणम्, चौखाम्वा संस्कृत सीरिज्, वाराणसी, २०१३ ।
- पाण्डेयः बी, *दशरूपकम्,* षष्ठसंस्करणम्, मोतीलाल बनारसीदास, दिल्ली, २०१५ ।
- वन्द्योपाध्यायः एस्. सी. *नाट्यशास्त्रम्,* षष्ठसंस्करणम्, नवपत्र प्रकाशन, कोलकाता, २०१४ ।
- मिश्रः आर्. *वक्रोक्तिजीवितम्,* चौखाम्बा संस्कृत संस्थानम्, वाराणसी, २००१ ।
- द्विवेदी आर्. पी. *व्यक्तिविवेकः,* आत्माराम एण्ड सन्स, देहली, १९५५ ।
- कीथ ए. वी. *ए हिस्ट्रि अफ संस्कृत लिटारेचार,* अक्सफोर्ड इउनिभार्सिटि प्रेस, लण्डन, १९२०।
- स्मिथ वी. ए. *दि आर्लि हिस्ट्रि अफ इण्डिया* ,अक्सफोर्ड इउनिभार्सिटि प्रेस, लण्डन, १९१४ ।


———